- Title – विवाह पद्धति
- Accession No – Title –
- Accession No –
- Folio No/ Pages – ३० पेज
- Lines-
- Size
- Substance Paper –
- Script Devanagari — देवनागरी
- Language – संस्कृत
- Period –
- Beginning – पवित्रापोत्श्रण्यादकेन प्रदक्षिणाजानु कुर्शेण
- End – शतं जीवेम शरदः शतं, शृणुयाम शरदः शतमीति
- Colophon-
- Illustrations -
- Source -
- Subject -
- Revisor -
- Author -
- Remarks- ११ — से ४५ अपूर्ण

उपासना

॥
प्रा॰

पवित्रप्रोक्षणमुदकेन प्रदक्षिणान्तुः कुशेण ब्रा
ह्मणान्वारब्धः समिद्धतमग्नौ स्रुवेणाज्याहुतिर्जु
होति तत्राघारादारभ्य द्वादशाहुतिषु तदाहुत्यन
तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्र
क्षेपः ॐ प्रजापतये स्वाहा इदं प्रजापतये इति
मनसा ॐ इन्द्राय स्वाहा इदमिन्द्राय इत्याघारौ ॐ
अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं
सोमाय इत्याज्यभागौ ॐ भूः स्वाहा इदं भूः
ॐ भुवः स्वाहा इदं भुवः ॐ स्वः स्वाहा इदं स्वः
एता महाव्याहृतयः ॐ त्वन्नोऽअग्ने वरुणस्य वि

निधाय आज्यस्थाल्यामाज्यं निर्वापस्ततोऽधिश्रयणं
ततो ज्वलत्तृणादिना हविर्वेष्टयित्वा प्रदक्षिण
क्रमेण पर्यग्निकरणं ततः स्रुवप्रतपनं कृत्वा
संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुव
संमार्जनं प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्रु
वं दक्षिणतोऽग्नेर्निदध्यात् ततो आज्यस्याग्नेरवतार
णं ततः आज्यस्य प्रोक्षणीवदुत्पवनं अवेक्ष्य सत्यपि
द्रव्ये तन्निरसनं प्रोक्षण्युत्पवनं ततः उपयमन
कुशानादाय उत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा
तूष्णीमग्नौ समिधः क्षिपेत् ततः उपविश्य प्रसु

इदंबुधाय ॐबृहस्पतयेस्वाहा इदंबृहस्पतये ॐशु
क्रायस्वाहा इदंशुक्राय ॐशनैश्चरायस्वाहा इदंश
नैश्चराय ॐराहवेस्वाहा इदंराहवे ॐकेतवेस्वाहा
इदंकेतवे ॐउग्रायस्वाहा इदमुग्राय ॐभीमाय
स्वाहा इदंभीमाय ॐपुष्णेस्वाहा इदंपुष्णे ॐवरु
णायस्वाहा इदंवरुणाय ॐपातकायस्वाहा इदं
पातकाय ॐदुर्गायस्वाहा इदंदुर्गाय ॐक्षेत्रपाला
यस्वाहा इदंक्षेत्रपालाय ॐभैरवायस्वाहा इदंभै
रवाय ॐप्रजापतयेस्वाहा इदंप्रजापतये ॐचंद्रा
यस्वाहा इदंचंद्रायस्वाहा इदंचंद्राय ॐइंद्रायस्वा

१२ प्रा. हा इदमिंद्राय ॐअग्नयेस्वाहा इदमग्नये ॐसोमा
यस्वाहा इदंसोमाय एतामहाव्याहृतयः ॐभूःस्वा
हा इदंभूः ॐभुवःस्वाहा इदंभुवः ॐस्वःस्वाहा
इदंस्वः ॐप्रजापतयेस्वाहा इदंप्रजापतये ॐ
अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते स्रु
वावशिष्टस्य प्रोक्षणीपात्रेप्रक्षेपः ततःसंस्रवप्राश
नं अथाचमनः ॐअद्यकृतेतस्मिन्शांतिहोमकर्मणि
कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिमंत
ण्डुलसप्रणीपात्रंप्रजापतिदैवताकंब्रह्मणेदक्षिणा
तुभ्यमहंसंप्रददे ब्रह्मग्रन्थिविमोकः ॐसुमित्रया

हः १ सेधिविन्यवहकः श्रीमच्छ्रीरेश्वरसहोदरः म
हामहसमः श्रीमान् श्विराज्ञेनतगणेश्वरः श्रीम
ता रामदत्तेन मे श्चिगानस्ववस्तुना पद्धतिंकृय
तेरम्याधर्म्यावानसनेकिनां तत्रंकन्याहस्तेनयो
डपाहतमंडपंविधाय नहूलिखहिचिपांश्रीमा
हैदरामाश्रित्यमंडपंलग्नमुत्तराभिमुखंवेदितुरा
गारं मंडपाद्दक्षिणे प्रान्यांदिश आमात्र चतुर्हस्त
परिमितमिकनाहपरिष्कृतां तु यके गाणाकेरादि
रहितां स्वन्येव स्तुनिर्मितां वेदीं चकारयेत् वि

6

१५ वाहदिने कृतनित्यक्रियेण जामातृपित्रा मातृपूजा
वि॰ पूर्वकमाभ्युदयिकं कर्तव्यं कन्यापित्रा शुचिः स्ना
तः शुक्लांबरधरः कृतनित्यक्रियो मातृपूजाभ्युदके
कृत्वा लग्नवेलायां मंडपे प्रत्यङ्मुखः प्राङ्मुखं वर
मर्हणाय संबोध्य ॐ साधु भवानास्तामर्चयिष्या
मो भवंतमिति ब्रूयात् ॐ अर्चय इति प्रत्युक्ते वरोपवे
शनार्थं शुद्धमासनं दत्वा विष्टरमादाय विष्टरो वि
ष्टरो विष्टरः इत्यन्येनोक्ते ॐ विष्टरः प्रतिगृह्यता
मिति दाता वदेत् ॐ विष्टरं प्रतिगृह्णामीत्यभिधाय

7

वरोविष्टरंगृहीत्वा ॐवर्ष्मोस्मिसमानानामुद्यता
मिवसूर्य्यः इमंतमभितिष्ठामियोमांकश्चाभिदास
ति इत्यासनेउत्तराग्रविष्टरोपरिवरोपविशति ततः
उपविष्टययजमानः पाद्यमंजलिमादाय पाद्यंपाद्यं
पाद्यमित्यन्येनोक्ते: ॐपाद्यंप्रतिगृह्यतामितिदाता
वदेत् ॐपाद्यंप्रतिगृह्णामीत्यभिधायवरयजमानांज
लितोंजलिनापाद्यमादायवरः ॐविराजोदोहो
वा सिविराजोदोहमशीयमयिपाद्यायैविराजोदोहः
इतिदक्षिणपादंप्रक्षालयति अनेनैवक्रमेण

8

१६ नेनैवमंत्रेणान्यामचरणप्रक्षालनं ततः द्वितीयविष्टरो
त्तरं गृहीत्वा चरणयोरधस्तादुत्तरामंत्रः कुर्यात्
ततो दूर्वाक्षतफलपुष्पचंदनयुतार्घपात्रं गृहीत्वाय
जमानः ओं अर्घो र्घो र्घः ३ इत्यन्येनोक्ते ओं अर्घः प्र
तिगृह्यतामिति दातावदेत् ततो वरः ओं अर्घं प्रति
गृह्णामीत्यभिधाय यजमानहस्तादर्घं गृहीत्वा
ओं आपः स्थ युष्माभिः सर्वान् कामानवाप्नवानीति
२ शिरस्यक्षतादिकिंचिद्दत्वा ओं समुद्रं वः प्रहिणोमि
स्वां योनिमभिगच्छतारिष्टास्माकं वीरा मा परा
सेचि मत्पयः इत्यर्घपात्रस्थजलमैशान्यांत्यज

ग

न् पठन्ति ततआचमनीयमादाय ओं आचमनीयमा
चमनीयं आचमनीयमित्यन्येनोक्ते ओं आचमनीयं
प्रतिगृह्यतामितिदातावदेत् ततोवरः ओं आचम
नीयंप्रतिगृह्णामीत्यभिधाययजमानहस्तादाचम
नीयमादाय ओं आमागन्यशसासंसृजवर्च
सातंमाकुरुप्रियंप्रजानामधिपतिंपशूनामरिष्टंत
नूनां इत्यनेनसकृदाचमनंद्विस्तूष्णीं ततोयजमा
नः कांस्यपात्रस्थदधिमधुघृतानिकांस्यपात्रपिहि
तान्यादाय ओंमधुपर्कोमधुपर्कोमधुपर्कः इ
त्यनेनोक्ते ओंमधुपर्कःप्रतिगृह्यतामितिदातावदे

१८

त् ततो वरः ॐ मधुपर्कं प्रतिगृह्णामीत्यभिधाय ॐ
मित्रस्य त्वा चक्षुषा प्रतीक्षे इति यजमानवक्त्रस्य मे
वन्निरीक्ष्य ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यां प्रतिगृह्णामीत्यनेन मधुपर्कं गृही
त्वा वामहस्ते धृत्वा ॐ नमः श्यावास्यायान्नशने
यत आविद्धं तत्ते निष्कृन्तामि इत्यनामिकया त्रिः
प्रदक्षिणमालोड्यानामिकाङ्गुष्ठाभ्यां भूमौ निःक्षि
यच्चाशन पेत् पुनस्तथैव त्रिः प्रत्येकं क्षिपेत् ॐ यन्मधुनो
कन्यका मधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनो मधव्ये
ईशाय न परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसा
पिस्त्वो

10

नि इत्यनेन वा त्रयं मधुपर्कं प्राशनं प्रति प्राशने
चैतन्मन्त्रपाठः ततो मधुपर्कशेषमसंचरदेशे धा
रयेत् ततः आचम्य ॐ वाङ्म आस्येऽस्तु नसोर्मे प्रा
णोऽस्तु अक्ष्णोर्मे चक्षुरस्तु कर्णयोर्मे श्रोत्रमस्तु
बाह्वोर्मे बलमस्तु ऊर्वोर्मे ओजोऽस्तु ॐ अरिष्टा
नि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु इत्यास्यादि प्रत्ये
कं सर्वगात्राण्यालभ्य ॐ गौर्गौर्गौरिति त्रिरभिहिते
यजमानेन ॐ माता रुद्राणां दुहिता वसूनां स्वसा
दित्यानाममृतस्य नाभिः प्रनुवोचं चिकितुषे ज
नाय मा गामनागामदितिं वधिष्ट मम चामुकशर्म

वि. ९

12

लोयज्ञमानस्य पात्रमाहृतः ॐ उत्सृजत तृणान्विति
तृणं छिंद्यात् ततो वेदिकायां तुषकेशपार्श्वरहिते र
हितायां हस्तमात्रपरिमितं चतुरस्रां भूमिं कुशैः परि
समूह्य तान्कुशानैशान्यां परित्यज्य गोमयोदकेनो
पलिप्य स्रुवेण स्रुवेण वामभागमध्यादेशमात्रमुत्तरो
त्तर क्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेणानामिका
गुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य तत्रस्थीकां
स्यपात्रस्थवह्निमेत्य पुरस्तादुपसमाधाय तद्दक्षि
णे केचिन्नियुज्य कौतुकागाराद्वरः कन्यामादानी
यमंडपे अथ वरपरिधानवस्त्रं तस्मै ददाति ॐ जरां

गच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपा
वा शतं च जीव शरदः सुवर्चा रयिं च पुत्राननु
संव्ययस्वायुष्मतीदं परिधत्स्व वासः इति परि
त्वा परिधानवस्त्रस्य दशा लिचरः ततोऽपाकृ
कृन्तन्नवयन्या अतन्वन् या अदेवीरन्तानभितो
ततंथ तास्त्वा देवी जरसे संव्ययस्वायुष्मतीदं प
रिधत्स्व वासः इति परिहित्वोत्तरीयं ददाति ततः
ओं परिधास्ये यशो धास्ये दीर्घायुत्वाय जरद
ष्टिरस्मि शतं च जीवामि शरदः पुरूची रायस्पो
षमभि संव्ययिष्ये इति परिहित्वा वरः परिधत्ते

१६ ओं यथासामाद्यावापृथिवीच यथासेन्द्राबृहस्पती यथो
वि भगश्चामाश्विहुर्यथोमा प्रतिपद्यतां इति पठित्वो
त्तरीयं परिदधाति ततोवरस्यकन्यायाश्चहृदा॰च
मनं ततः कन्याप्रदेनपरस्परं समंजेया इति मंत्रे
ण कन्यावरयोः परस्परमभिमुखीकरणं ओं सम
जंतु विश्वेदेवाः समापो हृदयानि नौ समातरि
श्वा संधाता समुदेष्ट्री दधातु नौ इति वरः पठति
ततः कन्या मस्तके रक्तं सूत्रबंधनं अथ कन्याद
ले नं दाता करवास्य दूर्वाक्षतं फलपुष्प चंदनजला
न्यादाय जामातृ दक्षिणकरोपरि कन्यादक्षिण

करंनिधाय ओंदातानृंवरुणोराजाऽव्यमादित्य
दैवतं विप्रोतोविस्नुनृपेणप्रतिग्रहणेत्वयंविधिः
इतिपठित्वा ओंअद्यामुकमालीयामुकपत्नीया
मुकंत्रयावमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्म
णः प्रपौत्राय अमुकगोत्रस्यामुकप्रवरस्यामु
कशर्म्मणः पौत्राय अमुकगोत्रस्यामुकप्रवर
स्यामुकशर्म्मणः पुत्राय अमुकगोत्रस्यामु
कप्रवरस्यामुकशर्म्मणः प्रपौत्रीं अमुकगो
त्रस्यामुकप्रवरस्यामुकशर्म्मणः पौत्रीं अमु
कगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः पुत्रीं

२० अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः प्र
वि॰ पौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म
णः पौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकश 16
र्म्मणः पुत्राय अमुकगोत्रस्यामुकप्रवरस्यामु
कशर्म्मणः प्रपौत्रीं अमुकगोत्रस्यामुकप्रव
रस्यामुकशर्म्मणः पौत्रीं अमुकगोत्रस्यामुक
प्रवरस्यामुकशर्म्मणः पुत्रीं अमुकगोत्रस्या
मुकशर्म्मणः प्रपौत्राय अमुकगोत्रस्यामुक
प्रवरस्यामुकशर्म्मणः पौत्राय अमुकगोत्रस्या
मुकप्रवरस्यामुकशर्म्मणः पुत्राय अमुकगो

17

उत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रोक्षणी
पात्रस्य सव्यहस्तकरणं अनामिकांगुष्ठाभ्यां पवित्रे गृ
हीत्वा त्रिरुद्गिंगनं प्रणीतोदकेन प्रोक्षणी प्रोक्षणं
ततः प्रोक्षणीजलेन यथासादितवस्तुसेचनं ततो
ग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रनिधानं आज्य
स्थाल्यामाज्यनिर्वापः ततोधिश्रयणं ततोज्वलि
ततृणादिना हविर्वेष्टयित्वा प्रदक्षिणक्रमेण प
र्यग्निकरणं ततः स्रुवप्रतपनं कृत्वा संमार्जेन
कुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवसंमार्जनं
प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्रुवं दक्षिण

२५ तोनिदध्यात् आज्यस्याग्नेरवतारणं ततः आज्येन
वि. प्रोक्षणीवदुत्पवनं अवेक्ष्य सत्यपद्रव्ये तन्निरसनं
ततः पूर्ववत् प्रोक्षण्युत्पवनं उपयमनकुशान् 18
वामहस्तेनादायोत्तिष्ठन् प्रजापतिं मनसा
ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधः तिस्रः क्षि
पेत् ततउपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षि
णक्रमेणाग्निं पर्युक्षणं कृत्वा प्रणीतापात्रे प
वित्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्म
णान्वारब्धः समिद्धतमेग्नौ स्रुवेणाज्याहुतीर्जु
होति तत्राघारादारभ्य द्वादशाहुतिषु तत्तदा

हुत्यनंतरं स्रुवावस्थितहुतशेषघृतं तस्मिन्प्रोक्षणी
पात्रेप्रक्षेपः ओं प्रजापतये स्वाहा इदं प्रजा
पतये इति मनसा ओं इन्द्राय स्वाहा इदमिन्द्रा
य इत्याघारौ ओं अग्नये स्वाहा इदमग्नये ओं
सोमाय स्वाहा इदं सोमाय इत्याज्यभागौ ओं
भूः स्वाहा इदं भूः ओं भुवः स्वाहा इदं भुवः
ओं स्वः स्वाहा इदं स्वः एता महाव्याहृतयः ओं
त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अव
वासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो वि
श्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नि

२५
वि॰

वरुणाभ्यां ॥ ओं सत्वन्नोऽअग्नेऽवमो भवोती नेदि
ष्ठोऽअस्याऽउषसो व्युष्टौ । अवयक्ष्वनो वरुणᳬं र
राणो वीहि मृडीकᳬं सुहवो न एधि स्वाहा ।
इदमग्नीवरुणाभ्यां ॥ ओं अयाश्चाग्नेऽस्यनभि
शस्तिपाश्च सत्यमित्त्वमया असि । अयानो य
ज्ञं वहास्ययानो धेहि भेषजᳬं स्वाहा । इदम
ग्नये ॥ ओं ये ते शतं वरुण ये सहस्रं यज्ञियाः पा
शा वितता महान्तः । तेभिर्नोऽअद्य सवितोत वि
ष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा । इदं वरु
णाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः

20

तेभ्यः ४ ॐ उदुत्तमं वरुणपाशमस्मदवाध
मं विमध्यमं श्रथाय अथा वयमादित्यव्र
ते तवानागसो अदितये स्याम स्वाहा इदं वरु
णाय ५ एताः सर्वा प्रायश्चित्त संज्ञकाः १२
ततोन्वारब्धं विना ॐ ऋताषाड् ऋतधामा
ग्निर्गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा
वाट् इदमृताषाहे ऋतधाम्नेऽग्नये गंध
र्वाय १ ॐ ऋताषाड् ऋतधामाग्निर्गंधर्व
स्तस्यौषधयो प्सरसो मुदो नाम ताभ्यः स्वाहा

2

२६ वि:

इदमोषधिभ्योप्सरेभ्योमुद्भ्यः २ ॐसᳫंहि
तोविश्वसामासूर्य्योगंधर्वःसनइदंब्रह्मक्षत्रं
पातुतस्मैस्वाहा वाट् इदंसᳫंहितायविश्व
साम्नेसूर्य्यायगंधर्वाय ॐसᳫंहितोविश्व
सामासूर्य्योगंधर्वस्तस्यमरीचयोप्सरसआयु
वोनामताभ्यःस्वाहा इदंमरीचिभ्योप्सरोभ्य
आयुभ्यः ॐसुषुम्णःसूर्य्यरश्मिश्चंद्रमागं
धर्वःसनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा वाट्
इदंसुषुम्णायसूर्य्यरश्मयेचंद्रमसेगंध

र्वाय ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गंधर्वस्तस्य न
क्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा इदं
नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यः ॐ इषिरो विश्वव्य
चा वातो गंधर्वस्स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा
वाट् इदमिषिराय विश्वव्यचसे वाताय गंधर्वा
य ॐ इषिरो विश्वव्यचा वातो गंधर्वः तस्या
पो अप्सरसः ऊर्जो नाम ताभ्यः स्वाहा इदमद्भ्योऽप्स
रोभ्य ऊर्ग्भ्यः ॐ भुज्युः सुपर्णो यज्ञो गंधर्वः स न
इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् इदं भुज्यवे सु
पर्णाय यज्ञाय गंधर्वाय ॐ भुज्युः सुपर्णो यज्ञो

२७ गंधर्वस्तस्यदक्षिणाप्सरसस्तावानामताभ्यःस्वा
वि. हा ॐप्रजापतिर्विश्वकर्मामनोगंधर्वःसनइदं
ब्रह्मक्षत्रंपातुतस्मैस्वाहा वाट् इदंप्रजापतये
विश्वकर्मणेमनसेगंधर्वाय ॐप्रजापतिर्विश्वक
र्मामनोगंधर्वस्तस्यऋक्सामान्यप्सरसएष्टयोना
मताभ्यःस्वाहा इदमृक्सामेभ्योप्सरोभ्यएष्टिभ्यः
इतिराष्ट्रभृतः ॐचित्तंचस्वाहा इदंचित्ताय ॐ
चित्तिश्चस्वाहा इदंचित्त्यै ॐआकूतंचस्वाहा
इदमाकूताय ॐआकूतिश्चस्वाहा इदमाकूत्यै
ॐविज्ञातंचस्वाहा इदंविज्ञाताय ॐविज्ञा

भ्यस्स्वाहा इदं विस्नात्ये ओं मनसस्स्वाहा इ
दं मनसे ओं शाकरीभ्यस्स्वाहा इदं शाकरीभ्यः
ओं दर्पेभ्यस्स्वाहा इदं दर्पाय ओं पौर्णमास्यै च
स्वाहा इदं पौर्णमासाय ओं बृहते स्वाहा इदं बृ
हते ओं रथन्तराय च स्वाहा इदं रथन्तराय ओं प्रजा
पतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु
तस्मै विशः समनमन्त सर्वास्स उग्रः स इह हव्यो बभू
व स्वाहा इदं प्रजापतये जयानिन्द्राय इति ज
याहोमः ओं अग्निर्भूतानामधिपतिः स माव
त्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरो

26

२८ वि. धायामस्मिन्कर्मण्यस्यां देवहूत्यां स्वाहा ॥
इदमग्नये भूतानामधिपतये ओं इन्द्रो ज्येष्ठानाम
धिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्या
माशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां
स्वाहा इदमिन्द्राय ज्येष्ठानामधिपतये ओं
यमः पृथिव्याधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मि
न्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां
देवहूत्यां स्वाहा इदं यमाय पृथिव्याधि
पतये अत्र प्रणीतोदकस्पर्शः ओं वायुरन्तरिक्ष
स्याधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्या

माशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां
स्वाहा इदं वायवेऽन्तरिक्षस्याधिपतये ओं
सूर्यो दिवोधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन्
क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां
देवहूत्यां स्वाहा इदं सूर्याय दिवोधिपतये
ओं चन्द्रमा नक्षत्राणामधिपतिः समावत्वस्मिन् ब्रह्म
ण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्क
र्मण्यस्यां देवहूत्यां स्वाहा इदं चन्द्रमसे नक्षत्रा
णामधिपतये ओं बृहस्पतिः ब्रह्मणोधिपतिः स
मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां

२८ पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां स्वाहा
वि. इदं बृहस्पतये ब्रह्मणोऽधिपतये ओं मित्रः सत्याना
मधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्या
माशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहू
त्यां स्वाहा इदं मित्राय सत्यानामधिपतये ओं
वरुणोऽपामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मि
न्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां
देवहूत्यां स्वाहा इदं वरुणायापामधिपतये
ओं समुद्रः स्रोत्यानामधिपतिः स मावत्वस्मिन् ब्र
ह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मि

न्कर्मण्यस्यां देवहूत्याꣳ स्वाहा इदं समुद्राय स्रो
त्यानामधिपतये ओं अन्नꣳ साम्राज्यानामधि
पतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशि
ष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ
स्वाहा इदमन्नाय साम्राज्यानामधिपतये ओं
सोम ओषधीनामधिपतिः समावत्वस्मिन्ब्रह्म
ण्यस्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्क
र्मण्यस्यां देवहूत्याꣳ स्वाहा इदं सोमायौष
धीनामधिपतये ओं सविता प्रसवानामधिप
तिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशि

30

३० अस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां
वि. स्वाहा ॥ इदं सवित्रे प्रसवानामधिपतये ॥ ओं रुद्रः
पशूनामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन्
क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्य
स्यां देवहूत्यां स्वाहा ॥ इदं रुद्राय पशूनामधि
पतये ॥ एवं प्रत्येकं सर्वाणि ॥ ओं त्वष्टा रू
पाणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मि
न् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म
ण्यस्यां देवहूत्यां स्वाहा ॥ इदं त्वष्ट्रे रूपाणा
मधिपतये ॥ ओं विष्णुः पर्वतानामधिपतिः स

मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां
पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां ॐ स्वाहा
इदं सर्वपर्वतानामधिपतये ॐ मरुतो ग
णानामधिपतयः स्मावन्त्वस्मिन् ब्रह्मण्यस्मिन्
क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्म
ण्यस्यां देवहूत्यां ॐ स्वाहा इदं मरुद्भ्यो गणा
नामधिपतिभ्यः ॐ पितरः पितामहाः परावरे
ततास्ततामहाः इह मावन्त्वस्मिन् ब्रह्मण्यस्मि
न्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्म
ण्यस्यां देवहूत्यां ॐ स्वाहा इदं पितृभ्यः पिता

३१ महेभ्यः परेभ्यो वरेभ्यः स्तोभ्यस्तामहेभ्यः अत्र ३२
वि॰ प्रणीतोदकस्पर्शः इत्यभ्यातानतामकं ओं अ
ग्निरैतु प्रथमो देवतानां सोऽस्यै प्रजां मुंचतु मृ
त्युपाशात् तदयं राजा वरुणोऽनुमन्यतां यथेयं
स्त्री पौत्रमघन्न रोदात् स्वाहा इदमग्नये ओं
इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु
दीर्घमायुः अशून्योपस्था जीवतामस्तु माता
पौत्रमानन्दमभि विबुध्यतामियं स्वाहा इदम
ग्नये ओं स्वस्ति नोऽग्ने दिवा विश्वानि धेह्ययथा
यजत्र यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु

द्रविणंधेहिचित्रंस्वाहा इदमग्नये ॐसुग
न्नुपंथांप्रदिशन्नएहिज्योतिष्मध्येह्यजरन्नआयुः
अपैतुमृत्युरमृतंनआगन्वैवस्वतोनोऽभयंकृणो
तुस्वाहा इदंवैवस्वताय अत्रमृत्योर्नोदकस्पर्शः
वेलविधानं ॐपरंमृत्योऽअनुपरेहिपंथांय
स्तेअन्यइतरोदेवयानात् चक्षुष्मतेशृण्वतेते
ब्रवीमिमानःप्रजांरीरिषोमोतवीरान्स्वाहा
इदंमृत्यवे अत्रमृत्योर्नोदकस्पर्शः ततोवधू
मस्तकेकृत्वावधूवरौमाङ्गल्यस्थितौभवतः त
तोवरौजलकुंडेपरिहितलग्नवस्त्रांजलिस्थघृता

ते

१२ भिधारितं वध्वा भ्रातृदत्तशमीपलाशमिश्रैर्जा।लैर्वि
ग्व धृकर्तृको मंत्रपाठपूर्वको होमः ॐ अर्यमणं
देवं कन्याऽग्निमयक्षत स नो अर्यमा देवः प्रेतो मु
ञ्चतु मा पतेः स्वाहा इदमर्यमणे ॐ इयं नार्यु
पब्रूते लाजानावपन्तिका आयुष्मानस्तु मे पतिरेधं
तां ज्ञातयो मम स्वाहा इदमग्नये ॐ इमाँल्लाजा
नावपाम्यग्नौ समृद्धिकरणं तव मम तुभ्यं च सं
वननं तदग्निरनुमन्यतामियं स्वाहा इदम
ग्नये ततो वरो वधूदक्षिणहस्तं सांगुष्ठं गृह्णा
ति ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या ज

रहक्षिपेयथा ह्मभोर्थे [illegible] मुं [illegible] मद्यंत्वादु
गार्हपत्याख्यदेवाः अमोहमस्मि सात्वं ॥ सात्वम
स्यमोहं सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी
त्वं तावेव विवहावहै सहरेतो दधावहै प्रजां प्र
जनयावहै पुत्रान्विंद्यावहै बहूनंतेसंतुजरद
ष्टयः संप्रियौरोचिष्णू सुमनस्यमानौ पश्येम
शरदः शतंजीवेमशरदः शतं ॥ शृणुयाम
शरदः शतमिति [illegible] अश्मान [illegible] मगवेहत
रतः मंत्रः [illegible] पक [illegible] तह [illegible] पलंदद्वि

२२ लपादेनारोहयतिवरः ॐ आरोहेममश्मानम
वि श्मेवत्व ँ स्थिराभव अभितिष्ठपृतन्यतोववा 36
धस्वपृतनायतः इतिमंत्रेणग्राहयावामेवत
स्यांवरोगायति ॐ सरस्वतिप्रेदमवसुभगेवा
जिनीवतियांत्वाविश्वस्यभूतस्यप्रजायामस्य
स्याग्रतः यस्यांभूत ँ समभवद्यस्यांविश्वमिदं
जगत् तामद्यगाथांगास्यामियास्त्रीणामुत्तमंय
शः ततोग्रेवधूः पश्चाद्वरः अग्निंतावुभौसहि
तमग्निंप्रदक्षिणांकुरुतः तत्रवरपठनीयोमं
त्रः ॐ तुभ्यमग्नेपर्यवहन्त्सूर्यांवहतुनासह

पुनः पतिभ्यो जायां दाग्ने प्रजया सह ॥ ततः पश्चा
दग्नेः स्थित्वा लाजाहोमसंकल्पं हस्तं गृह्णाति अश्मा
रोहणाय वामपादेन शिलामवरोहयति पुनरपि त
स्यैव दक्षिणेन वलाङ्गुष्ठः सांगुष्ठहस्तं गृह्ण
त्येवं प्रथमारोहणं द्वयं कार्यम् एवं मद्वि
ल द्वयं संपद्यते ॥ ततो वधूशिरसि लाजैः कृत्वा भ्रा
तृदत्तैरंजलिस्थ स्रुचिकोणेन वधूर्जुहोति
ॐ अर्यमणं स्वाहा इदं अर्यमणे ... ततः पश्चा
द्धृतः ततः स्त्री चतुर्थं ... ततो वरः ...
वेदीं ... प्रजापत्यं हुत्वा ॐ प्र

३८

३८ जापतयेस्वाहा इदंप्रजापतये इतिमनसा अ
वि वमोग्निरणीपावेहुतशेषान्यप्रहोप: ततःआ
लेपनेनोत्तरोत्तरक्रमेणसप्तमंडलेषुसप्तपदाक्र
मणंवरःकारयन्तिवक्ष्यमाणमंत्रैः ततःप्रथमे
ओं एकमिषेविष्णुस्त्वानयतु द्वितीये ओं द्वेऊ
र्जेविष्णुस्त्वानयतु तृतीये ओं त्रीणिरायस्पो
षायविष्णुस्त्वानयतु चतुर्थे ओं चत्वारिमायो
भवायविष्णुस्त्वानयतु पंचमे ओं पंचपशुभ्योवि
ष्णुस्त्वानयतु षष्ठे ओं षड्ऋतुभ्योविष्णुस्त्वा
नयतु सप्तमे ओं सखेसप्तपदाभवसमानुव्रता

38

भवन्विस्तुत्वानयन्तु ततोमेषंपश्चादुपविश्यपुरु
षस्कंधस्थितकुंभाद्दाम्रपल्लवेनजलमानीय ते
नवरोवत्समभिषिंचति ॐ आपः शिवाः शिव
तमाः शांताः शांततमाः तास्ते कृण्वंतु भेषजमि
त्यनेनपुनःकांस्यैवकुंभात्पात्रेआनीतजलेनात्मान
मभिषिंचति ॐ आपोहिष्ठामयोभुवः ॐ ता
नऊर्जेदधातनः ॐ महेरणायचक्षसे ॐ यो
वः शिवतमोरसः ॐ तस्यभाजयतेहनः ॐ उ
शतीरिवमातरः ॐ तस्माअरंगमामवो ॐ य

२५ सव्यपादजिघ्नय ओं आपो जनयथा च नः इतित्रि
वि. भिः ततः सूर्यमुदीक्षेति वधूं संबोध्य वरः आह 40
ततः ओं तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्ये
म शरदः शतं जीवेम शरदः शतं शृणुयाम शर
दः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शर
दः शतं भूयश्च शरदः शतात् इति पठित्वा वधूः
सूर्यं पश्यति अस्तमिते सूर्ये ध्रुवमुदीक्षस्वे
ति प्रतिप्रेषानंतरं ध्रुवं पश्यति तत्र वधूः पठनी
यो मंत्रः ओं ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पो

आमयिमह्यंत्वादाद्बृहस्पतिः मयापत्याप्रजाव
ती संजीवशरदः शतमितिहृद्यसायंदिनपश्यपति
तयापिपश्यपामीतिब्रूयात् अथवरोवध्वादक्षिणां
शस्योपरिहस्तंनीत्वातस्याहृदयमालभेत् ॐमम
व्रतेतेहृदयंदधामि ममचित्तमनुचित्तंतेअस्तु
ममवाचमेकमनाजुषस्वप्रजापतिस्त्वानियुन
क्तुमह्यमितिमंत्रेण अथवधूमभिमंत्रयतेव
रः ॐसुमंगलीरियंवधूरिमांसमेतपश्य
तसौभाग्यमस्यैदत्वायाथास्तंविपरेतन इतिमं

३६ त्रेण अथ वधूं बलवान् कश्चिद्ब्राह्मण उत्थाप्य
वि: प्रागुदग्वानुगागारे लोहितानुडुह चर्म्मणि प्रति
लोमास्तीर्णेऽउपवेशयेत् वरो वा ओं इह गावो निषी
दन्त्विहाश्वा इह पूरुषाः इहो सहस्रदक्षिणो यज्ञ इ
ह पूषा निषीदन्त्विति मंत्रेण अथ स्विष्टकृद्धोमः
ओं अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्ट
कृते स्रुवावशिष्टाज्यस्य प्रोक्षणीपात्रे प्रक्षेपः
अयंच होमोत्र स्वगारव्यकर्त्तृकः अपसव्य
वमाणानं अथाचमन ओंअद्यकैतेन द्विवाह 42

होमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म
प्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुक
गोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां
तुभ्यमहं संप्रददे इति ब्रह्मणे दक्षिणां दत्वा
ओं स्वस्तीति मन्त्रेण ब्रह्मग्रन्थिविमोकः ओं सु
मित्रिया न आप ओषधयः सन्तु इति पवित्रेण गृही
त्वा प्रणीताजलेन शिरः संमृज्य ओं दुर्मित्रिया
स्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः इत्यैशा
न्यां प्रणीतां न्युब्जीकुर्यात् ततः आस्तरणक

मेण वर्हिः स्तत्पाप्यां ज्येनाभिधार्य्य हस्तेनैव वर्हि
होमः तत्र मंत्रः ॐ देवा गातुविदो गातुं वित्वा
गातुमित मनसस्पत इमं देव यज्ञं स्वाहा वाते
धाः स्वाहा ततउपयमनवर्हिर्ग्रहाद्धस्तेन स्रुच
स्य ऐन हूनतुष्यफलैः स्रवेदितिः तत्र मंत्रः ॐ
मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ
जातमग्निं कविं सम्राजमतिथिं जनानामास
न्नापात्रं जनयन्तु देवाः स्वाहा ततउपयमन
स्रुवेण भस्मानीय वर्हिष्मानामिकाग्र हृदी

तभस्मना ओं त्र्यायुषंजमदग्नेः इतिललाटे ओं
कश्यपस्यत्र्यायुषं इतिग्रीवायां ओं यद्देवेषु
त्र्यायुषं इतिदक्षिणांसे ओं तन्नोऽस्तुत्र्यायु
षं इतिहृदि अनेनैवक्रमेण वध्वापि त्र्यायुषंकु
र्यात् नैवतन्नो इत्यस्यस्थाने तत्ते इतिशेषः ग
णपतिरत्नप्राप्तीसुवर्णेभेरितं सिंदूरकरणंवरकर्त्तृ
कं ततोऽन्यैरपि तिस्त्रीभिः सिंदूरकरणंना
मवचनंवरःकुर्यात् ताम्यास्तुयः अथवेदि
केमेहुपमागत्यदूर्वाक्षतादिग्रहणं ततस्त्रिरा

२८ अक्षारलवणाशिनौ अधःशायिनौ निवृत्तमै
वि॰ थुनौ भवतः इति विवाहः ॥ अथ चतुर्थीक
र्म ॥ ततश्चतुर्थ्यामपराह्णे चतुर्थीकर्म तच्च गृहाभ्यं
तरतः कार्यं तैलोद्वर्तनादि कृत्वा पुण्यकाले उ
पविश्य स्नात्वा शुचिवस्त्रं परिधायाचम्य गृहं प्रवि
श्य माङ्गल्यस्नातौ वधूवरौ उपविशतः ॥ अथ कुशकण्डि
कारंभः ॥ तत्र क्रमः कुशोद्धतमितचतुरस्रां भूमिं
परिसमूह्य कुशानैशान्यां निक्षिप्य गोमयोदके
नोपलिप्य स्रुवमूलेन स्फ्येन वा उत्तरोत्तरतस्त्रिरु 46

तिस्य उल्लेखनक्रमेणोद्धृत्यवारिणादेशान्नीभ्यविं
च्य कांस्यपात्रेणाग्निमादाय तत्रमत्यद्भ्रुस्तं नि
दध्यात् पुष्पचंदनतांबूलवासांस्यादाय ओं अ 47
स्यांत्राद्यौ कर्तव्यचतुर्थीकर्महोमकर्मणि कृताकृ
तावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुक
शर्म्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवासो
भिर्ब्रह्मत्वेन त्वामहं वृणे ओं वृतोस्मीति प्रतिवच
ने ओं यथाविहितं कर्म कुरु इति वरेणोक्ते ओं करवा
णीति ब्राह्मणवचनानंतरं अग्नेर्दक्षिणतः शुद्धमा

३९ सनं दत्वा तदुपरि मा०ं मवाकू कुँपाना त्रीय्यां गिंनं मद्द
वि दिगी कृत्वास्मिन्क मंगिगतं मे ब्रह्माभवेत्यभिधा
य ॐ भवानीतितेनैके तं ब्रह्माण्डमुपवेशयेत्
ततः एम्रूदकपात्रमन्त्रेण ततः मनिष्पाप्यम
णीनापात्रं पुनः कृत्वा वारिणा परिपूर्णं कुर्य्यात्
क्वाच्च ब्रह्मणो मुखमवलोकयान्नेक ततः कुपोप
रिनिदध्यात् ततः परिस्तरणं चा ष स्त्रतुर्थभागम
हायाग्ने पादी पानां तं अपरचतुर्थभागेन ब्रह्म
णोग्निपर्य्यंतं अपरेणाग्नेः कृत्वा द्वायव्यांतं प्रवे

ग्निहोत्रेनाग्नितः प्रणीतापर्य्यंतं ततोग्नेरुत्तरतः
पश्चिमतो द्विपवित्रं वेदेनार्थं कुशत्रयं पवित्र
करणार्थं यागावसरे नार्थं कुशपत्रद्वयं प्रोक्षणी
पात्रं आज्यस्थाली चरुस्थाली संमार्जनार्थं कु
शत्रयं उपयमनार्थं वेणीरूपकुशत्रयं समिध
स्तिस्रः स्रुवः आज्यं षट्पंचाशदुत्तरमुष्टिशतवर
पात्वर्धितप्रमाणं तंडुलपूर्णपात्रं चरं धेनुमासनं तंडुलाः
एतानि पवित्रच्छेदनकुशैः वरः पवित्रे छित्वा प्रणी
तोदकेन त्रिः सपवित्रकरेण प्रोक्षणीपात्रे निधा

४० यकराभ्यामनामिकांगुष्ठाभ्यां मुत्तराग्रे पवित्रे
वि. गृहीत्वा त्रिरुत्पवनं विधाय ततः प्रोक्षणीपा
त्रं वामहस्ते कृत्वा अनामिकांगुष्ठाभ्यां पवित्रे
गृहीत्वा त्रिरुद्दिंगनं प्रणीतोदकेन प्रोक्षणी
प्रोक्षणं ततः प्रोक्षणीजलेन यथासादितं
वस्तुसेचनं ततोग्नेरुत्तरतः प्रणीताद्दक्षिण
दिशि प्रोक्षणीपात्रं निदध्यात् आज्यस्था
ल्यामाज्यनिर्वापः प्रणीतानां किंचिद्वारि
निधाय प्रणीतानां नैव तंडुलान् प्रक्षाल्य च

त

मेक्षिपेत् स्रुवं च कं[…]त्सेत्वा ब्रह्मणा चाज्यं वह्न 51
वुत्तरेणाग्रे दक्षिणतश्चाज्यं निदध्यात् ततोन्व
ष्टकादि कर्म[…]वह्नि हृचोपरि यदहितेभ्या
भिहितावद्धोतम्[…]चैवावरुवं स्रुवं मल
प्र[…]क्रत्वा सम्मा[…]र्जं कुशानामग्रैः स्तरेणाग्नेर्वो
ष्ठतः स्रुवं सम्मा[…]र्ज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त
थैव प्रतप्य[…] दक्षिणतो निदध्यात् पश्चिमे
न चरुस्थालीमाज्यस्योत्तरतो निदध्यात् ततो बा
रद्वयं सोत्पवनीयं चाज्यस्योत्पवनं ग्रावेण्या सं
पतृप्ये तन्निरसनं पुनः सर्वत्तोत्पवनम्

ततउपयमनकुशानादाय वामहस्ते कृत्वाउ
त्तिष्ठन् समिधं घृताक्तां त्रिसः समिद्भिर्मौनेनाग्नौ हि
पेत् ततउपविश्य प्रोक्षणीजलेनाग्निमहदि
शं पर्युक्ष्य पवित्रे प्रणीतापात्रे धृत्वा ब्रह्मणा
न्वारब्धः पातितदक्षिणजानुर्जुहुयात् स्रुवाद्या
राघारभ्याहुतिचतुष्टये तत्तत्साद्यनन्तरं स्रुवा
वस्थिताज्यप्रोक्षणपात्रे प्रक्षेपः ओं प्रजापतये स्वा
हा इदं प्रजापतये इति मनसा ओं इन्द्राय स्वा
हा इदमिन्द्राय इत्याघारौ ओं अग्नये स्वाहा
इदमग्नये ओं सोमाय स्वाहा इदं सोमाय

इत्याज्यभागौ ततश्चाज्याहुतिपंचतयेस्था
लीपाकाहुतौच पूर्वोपकल्पितएषइकुपा
त्रे तत्तदाहुत्यनन्तरं [illegible] प्रक्षेपः आहुति
पंचतयेनान्वारभ्यः ओं अग्ने प्रायश्चित्ते
त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वानाथ
काम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै
नाशय स्वाहा। इदमग्नये। ओं वायो प्राय
श्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा
नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्ता

53

६२
वि.

मस्यैनाशायस्वाहा इदंवायवे ॐसूर्यमाय 54
श्रितेत्वंदेवानांमायश्रितिरसिब्राह्मणस्त्वाना
थकामउपधावामियास्यैपशुघ्नीतनूस्तामस्यै
नाशायस्वाहा इदंसूर्याय ३ ॐचंद्रमाय
श्रितेत्वंदेवानांमायश्रितिरसिब्राह्मणस्त्वा
नाथकामउपधावामियास्यैरहघ्नीतनूस्ता
मस्यैनाशायस्वाहा इदंचंद्राय ॐगंध
र्वमायश्रितेत्वंदेवानांमायश्रितिरसिब्राह्म
णस्त्वानाथकामउपधावामियास्यैयशो

प्रीतन्नक्तामस्मैनाप्यायस्वाहा इदंगंधर्वाय ५
ततःस्थालीपाकेनजुहोति ॐप्रजापतयेस्वा
हा इदंप्रजापतये इतिमनसा हुतशेषस्यपृथ
क्पात्रेप्रक्षेपः अग्निमाहुतिदशकेनतन्त्रदाऽ
नन्तरं हुतशेषस्यमोदकस्थालीपात्रेप्रक्षेपः स
र्वब्रह्मणाचारक्येनआज्यस्थालीपाकाभ्यां
स्विष्टकृद्धोमः ॐअग्नयेस्विष्टकृतेस्वाहा
इदमग्नयेस्विष्टकृते ततआज्येन ॐभूः
स्वाहा इदंभूः ॐभुवःस्वाहा इदंभुवः ॐ
स्वःस्वाहा इदंस्वः एतामहाव्याहृतयः ॐ

56

५२ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अव
वि. यासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो वि
श्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नी
वरुणाभ्यां ओं स त्वन्नो अग्नेऽवमो भवोती ने
दिष्ठो अस्या उषसो व्युष्टौ अव यक्ष्वनो वरुणं
रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इ
दमग्नीवरुणाभ्यां ओं अयाश्चाग्नेस्यनभिश
स्तिपाश्च सत्वमित्त्वमया असि अयानो यज्ञं वहा
स्ययानो धेहि भेषजं स्वाहा इदमग्नये ओं
ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितत

तामहांतः तेभिर्नोअद्यसवितोतविष्णुर्विश्वे
मुंचंतुमरुतःस्वर्काःस्वाहा इदंवरुणायसवि
त्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः ओं
उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्र
थाय अथावयमादित्यव्रतेतवानागसोअदि
तयेस्यामस्वाहा इदंवरुणाय एतासर्वाः
प्रायश्चित्तसंज्ञकाः ओंप्रजापतयेस्वाहा इ
दंप्रजापतये इतिमनसा इदंप्राजापत्यंत
तःसंस्रवप्राशनं ततआचम्य ओंअस्यांरात्रौ

कृतेतच्चातुर्थीहोमकर्म्मणि कृताकृतावेक्षण
रूपब्रह्मकर्मप्रतिष्ठार्थमिदं दक्षिणाचं प्रजापति
दैवतं अमुकगोत्रायामुकशर्म्मणे ब्राह्मणा-
य ब्रह्मणे दक्षिणां तुभ्यमहं संप्रददे इति दक्षि
णां दद्यात् ओं स्वस्तीति प्रतिवचनं ततो ब्र
ह्मग्रन्थिविमोकः ओं सुमित्रया न आप ओ
षधयः सन्तु इति पवित्राभ्यां शिरः संमृज्य
ओं दुर्मित्रयास्तस्मै सन्तु योस्मान्द्वेष्टि यंच
वयं द्विष्मः इत्यैशान्यां प्रणीता न्युब्जीकरणं

ततस्तरणक्रमेणवह्निस्थानीयघृतेनाभिघार्य्य
हस्तेनैवजुहुयात् ॐदेवागातुविदोगातुंवि
त्वागातुमितमनसस्पतइमंदेवयज्ञं स्वा
हा वातेधाःस्वाहा॰ इत्यनेनमंत्रेण ततःपू
र्वंहेकपात्रस्थजलमादायाग्नपल्लवैनानी
यवरोमूर्द्धिवधूमभिषिंचति ॐयातेपति
घ्नीप्रजाघ्नीपशुघ्नीगृहघ्नीयशोघ्नीनिंदि
तातनूर्जारघ्नीततएनांकरोमिसाजीर्य्य
त्वंमयासहश्रीअमुकदेवि इतिमंत्रेण ज

11-45

५५ तो वधूं स्थालीपाकं माशयति वरः ॐ मांसैस्ते
वि मांसानि संदधामि ॐ प्राणैस्ते प्राणान्संदधा
मि ॐ अस्थिभिस्तेऽस्थीनि संदधामि ॐ त्व
चा ते त्वचं संदधामि इति मंत्रचतुष्टयेन
प्रतिमंत्रं ते प्राशनं ततो वधूहृदयं स्पृ
ष्ट्वा वरः पठति ॐ यत्ते सुसीमे हृदयं दिवि चं
द्रमसि श्रितं तद्वेदाहं तन्मां तद्विद्यात् पश्ये
म शरदः शतं जीवेम शरदः शतं शृणु
याम शरदः शतमिति अग्न्यर्कंकण

(12, 21-23) missing